वि+आ+प्रकाशने व्याकरोति "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" श्रुतिः। व्याख्याने व्याकृतम् पाणिन्याद्युक्तशब्दसाधुत्वाधायकसंस्कारभेदे च "शिक्षा कल्पोव्याकरणं निरुक्तं छन्दसां चितिः" वेदाङ्गोक्तौ "व्याक्रियाव्यञ्जनीया वा जातिः कापीह सा श्रुता" भर्त्तृहरिः।

वि+प्र+उपद्रवे सक० विप्रकरोति "तस्मिन् विप्रकृताः काले" कुमा०। "कामपरवशं न विप्रकुर्य्युः" कुमा०।

सम्+संस्कारे सतोगुणान्तराधाने सक० सुट् च। संस्करोति पात्रम्।

सम्+परि उप+भूषणे अर्थे सुट्। संस्करोति परिष्करोति उपस्करोति अलङ्करोतीत्यर्थः। तत्पूर्व्वकाः समवायेऽर्थे च अक० सुट् संस्करोति उपस्करोति परिस्करोति संघीभवतीत्यर्थः उप+सतोगुणान्तराधाने विकारे आकाङ्क्षितवाक्यस्य पूरणे च सुट्। उपस्कृतं भुङ्क्ते विकृतं भुङ्क्ते। उपस्कृतं ब्रूते वाक्यमध्याहृत्य ब्रूते" सि०कौ०।

अथ मतभेदेन कृञोऽर्थोनिरूप्यते तत्र वैयाकरणाः तस्य यत्नार्थकत्वानिराकरणेन व्यापारार्थकतामाहुः यथा वै० भू० सारे

"व्यापारोभावना सैवोत्पादना सैव च क्रिया। कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते" मू०।

"पचति पाकमुत्पादयति पाकानुकूला भावना तादृश्युत्पादनेत्यादिविवरणाद्विवियमाणस्यापि तद्वाचकतेति भावः। व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अतएव पचतीत्यत्राधःसन्तापनत्वफूत्कारत्वचूल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः। नचैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम् रथो गच्छति जानातीत्यादौ च व्यापारत्वादिप्रकारकबोधोलक्षणयेति नैयायिकरीतिः साध्वी, शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद्गुरुणि सम्भवात् तयोर्वैषम्ये वीजाभावात्। नच पचति पाकं करोतीति यत्नार्थकरोतिना विवरणाद्यत्नएवाख्यातार्थ इति वाच्यम्। रथोगमनं करोति वीजादिना अङ्कुरः कृत इति दर्शनात् कृञोयत्नार्थकताया असिद्धेः। किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटोभवतीत्यत्रापि द्वितीया स्यात् नचात्र घटस्य कर्त्तृत्वेन तत्संज्ञया कर्म्मसंज्ञायाबाधान्न द्वितीयेति वाच्यम् अनुगतकर्त्तृत्वस्य त्वन्मते दुर्व्वचत्वेन घटस्याकर्त्तृत्वात्। कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्। अपि च भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनायावाच्यत्वमन्तरेणासम्भवि। अन्यतमत्वं तत्त्वमिति चेन्न एकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वदर्शनात् तदेतदभिसन्धायाह कृञ इति। अयं भावः व्यापारावाच्यत्वपक्षे फलमात्रमर्थइति फलितम्। तथा च करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथा च यतो प्रयत्नइतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्मकतापत्तिः उक्तरीत्या दुर्वारेति। तथा च नहि यत्नः इत्यत्र फलस्थानीयत्वेनेति शेषः कृञः इति धातुमात्रोपलक्षणं सर्वेषामप्यकर्म्मकता सकर्मकता वा न स्यादिति भावः। अथ वा व्यापारोभावना इत्यर्द्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन् नैयायिकाभ्युपगतं जानातिकृञादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति कृञः इति। अयं भावः फलांशस्यावाच्यत्वे व्यापारएव धात्वर्थः स्यात्। तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः। नच कृञादौ सकर्म्मकत्वव्यवहारोभाक्तइति नैयायिकोक्तं युक्तम् व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात्। न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्त्तुं शक्यम्। एवञ्च नहि यत्न इत्यत्र यत्नमात्रमित्यर्थः"। अतएवाह।

"किन्तूत्पादनमेवातः कर्म्मवत्स्यात् यगाद्यपि।
कर्मकर्त्तर्य्यन्यथा तु न भवेत् तद्दृशेरिव" मू०।

"उत्पादनम् उत्पत्तिरूपफलसहितं यत्नादि कृञर्थइत्यर्थः। फलस्य वाच्यत्वे युक्त्यन्तरमाह अतइत्यादि। यतः कृञोयत्नमात्रार्थोनेष्यते अतः कर्मवत् स्यादिति पदेन 'कर्मवत्कर्मणा तुल्यक्रियः" इति(पा०)सूत्रं लक्ष्यते। अयमर्थः यतएवास्योत्पादनार्थकता अतः पच्यते ओदनः स्वयमेवेतिवत् क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात्तन्न स्यात् दृशिवत्। यथा दृश्यते घटः स्वयमेवेति न, दर्शनस्य घटावृत्तित्वात्तथा यत्नस्यापीति, तथा प्रयोगानुपपत्तेरिति"।